# Mahadevakritam 2 Vishnu Stotram

# મહાદેવકૃતં ૨ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Mahadevakritam 2 Vishnu Stotram

File name : mahAdevakRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 8/12/4-13||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 23, 2025

*sanskritdocuments.org*

Mahadevakritam 2 Vishnu Stotram

# મહાદેવકૃતં ૨ વિષ્ણુસ્તોત્રમ્

શ્રીમહાદેવ ઉવાચ ।
દેવદેવ જગદ્વ્યાપિન્ જગદીશ જગન્મય ।
સર્વેષામપિ ભાવાનાં ત્વમાત્મા હેતુરીશ્વરઃ ॥ ૪॥

આદ્યન્તાવસ્ય યન્મધ્યમિદમન્યદહં બહિઃ ।
યતોઽવ્યયસ્ય નૈતાનિ તત્સત્યં બ્રહ્મ ચિદ્ભવાન્ ॥ ૫॥

તવૈવ ચરણામ્ભોજં શ્રેયસ્કામા નિરાશિષઃ ।
વિસૃજ્યોભયતઃ સઙ્ગં મુનયઃ સમુપાસતે ॥ ૬॥

ત્વં બ્રહ્મ પૂર્ણમમૃતં વિગુણં વિશોક-
માનન્દમાત્રમવિકારમનન્યદન્યત્ ।
વિશ્વસ્ય હેતુરુદયસ્થિતિસંયમાના-
માત્મેશ્વરશ્ચ તદપેક્ષતયાનપેક્ષઃ ॥ ૭॥

એકસ્ત્વમેવ સદસદ્દ્વયમદ્વયં ચ
સ્વર્ણં કૃતાકૃતમિવેહ ન વસ્તુભેદઃ ।
અજ્ઞાનતસ્ત્વયિ જનૈર્વિહિતો વિકલ્પો
યસ્માદ્ગુણવ્યતિકરો નિરુપાધિકસ્ય ॥ ૮॥

ત્વાં બ્રહ્મ કેચિદવયન્ત્યુત ધર્મમેકે
એકે પરં સદસતોઃ પુરુષં પરેશમ્ ।
અન્યેઽવયન્તિ નવશક્તિયુતં પરં ત્વાં
કેચિન્મહાપુરુષમવ્યયમાત્મતન્ત્રમ્ ॥ ૯॥

નાહં પરાયુરૃષયો ન મરીચિમુખ્યા
જાનન્તિ યદ્વિરચિતં ખલુ સત્ત્વસર્ગાઃ ।
યન્માયયા મુષિતચેતસ ઈશ દૈત્ય-
મર્ત્યાદયઃ કિમુત શશ્વદભદ્રવૃત્તાઃ ॥ ૧૦॥

સ ત્વં સમીહિતમદઃ સ્થિતિજન્મનાશં
ભૂતેહિતં ચ જગતો ભવબન્ધમોક્ષૌ ।
વાયુર્યથા વિશતિ ખં ચ ચરાચરાખ્યં
સર્વં તદાત્મકતયાવગમોઽવરુન્ત્સે ॥ ૧૧॥

અવતારા મયા દૃષ્ટા રમમાણસ્ય તે ગુણૈઃ ।
સોઽહં તદ્દ્રષ્ટુમિચ્છામિ યત્તે યોષિદ્વપુર્ધૃતમ્ ॥ ૧૨॥

યેન સમ્મોહિતા દૈત્યાઃ પાયિતાશ્ચામૃતં સુરાઃ ।
તદ્દિદૃક્ષવ આયાતાઃ પરં કૌતૂહલં હિ નઃ ॥ ૧૩॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે અષ્ટમસ્કન્ધે દ્વાદશાધ્યાયાન્તર્ગતં
મહાદેવકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૮/૧૨/૪-૧૩॥

bhAgavatapurANa . adhyAya 8/12/4-13..

Proofread by PSA Easwaran

*Mahadevakritam 2 Vishnu Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*